CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

027

ग्रावस्तोत्रप्रयोगः
(mixed with सिद्धान्तमञ्जरी)

Script: Devanagari.

Material: P

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

16

ग्रावस्तोत्र प्रयोगः

॥ अच्छावाकप्रयोगः ॥

ग्रावस्तोत्रप्रयोगः

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

श्रीः ॥ ब्रह्मन्नो ग्रावस्तुत् ब्रह्मन् ब्रह्मन् इत्यादि जपित्वा मधुपर्कमादाय तान्त्रत्रंग गृह्णीयात् ॥ अग्ना
य द्वष्टमित्यपस्य त्रयसं जाप्याय नमं चतुरं भुष्ट इतिस्य ष्टाप प्रस्तरेनि द्धवीतेष्टाराय
इस्सधमा ग्यं दिनेसावनेती येनप्रपद्याध्वर्युपथ ऽपतिष्ठते ऽध्वनामध्वपइस्य नयः स
गरा इतिसूपादिस्याहवनीयनिर्मथ्यान नयः सगरा इतिस्थ्याघ्नतः शामित्राव
गाहच्चात्वालोत्करास्तावान नय इति दक्षिणावन्त आग्नीध्रीयमच्छावाकास्य वा दक्षिणाग्ना
जोत्तीयं स्वरमित्युपस्थायहविर्द्धानं द्वुत्वा तद्वारस्साटीमभिमृशो दुर्वमिति द्वाबौदृ दे
द्वारा वित्याग्तय इति सर्वानग्नीन नय इत्युपस्थितां श्चानुपस्थितां श्चोरु नो लोके नि
तिहविर्धानं प्रपद्य दक्षिणस्य हविर्धानस्य प्रागुदगुत्तरस्य क्षच्छिरस्स्कं एमं तव
निरस्यापस्य नयनोपविशाघाति अधीति जपित्वाऽध्वर्युं दत्तमुष्णीषमंजलिना प्रतिगृह्य चि
प्रदक्षिणं शिरः समुस्वं वेष्टयित्वाय दासोमा भूनभिषवाय व्यपोहंतिमध्यमस्वरेण ग्रावकृतां
क्तो

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥छ॥ शिवंमैनतारस्य द्वापरिच्छेदः॥छ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मनस्त्वं च आत्मान्यत्वे सति ज्ञानासमवायिकारणसंयोगाश्रयत्वमित्याहुः ॥ तन्न ॥ विभुत्वे आत्मना संयोगा
नुपपत्तेः ॥ तथाहि ॥ द्विविधः संयोगः ॥ कर्मजः अवयवसंयोगजश्चेति ॥ न चाविभुनात्मना कर्मा
स्ति ॥ मनोपि यदि विभु तदा तस्यापि कर्माभावात् ॥ अतः कर्मजसंयोगासंभवः ॥ न च तयोरव
यवोस्ति ॥ येन तत्संयोगजसंयोगः स्यात् ॥ न च नित्य एव विभुमनःसंयोगः ॥ अजसंयोगनिषेधा
त् ॥ कुतो निषेध इति चेत् ॥ मानाभावात् ॥ संयोगत्वावच्छेदेन द्रव्यजन्यत्वावधारणात् ॥ अथ
योजकं चेदमनुमानमिति संक्षेपः ॥ १ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥ शुभमस्तु ॥ श्री ॥
इति चूडामणौ भट्टाचार्यविरचितायां न्यायसिद्धान्तमञ्जर्यां प्रथमः प्रत्यक्षपरिच्छेदः स १
माप्तः ॥ ॐ ॥ इदं पुस्तकं वेङ्कटेशनस्यार्थं लिखितं ॥ श्री ॥ ॥ श्री ॥ गुरुभ्यो नमः ॥ शिवायनमः ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्थलादेव न गृह्यते॥ का पुनरसंसर्गाभावग्रहे योग्यता॥ योग्यमात्रप्रतियोगिके योग्यधर्मावच्छिन्नप्रति
योगिताकत्वं विशेषणं देयं॥ एवं अन्यत्रापि अनुभवानुसारेण योग्यता बोध्या॥ सर्वोऽभावसाक्षात्का
रेऽपि योग्यत्वमिति चेत्॥ न॥ किंचिदिति ग्रहात्॥ तर्हि किं ज्ञाने वा भावयोग्यतेति चेत्॥ ओं॥ शृणु ज्ञेय
स्यावदननुगतस्यैव तत्त्वादिति संक्षेपः॥ अथ॥ किमिदं चक्षुरादि॥ तैजसमिन्द्रियं रूपग्राहकं महदि
न्द्रियं वा चक्षुः॥ वायवीयमिन्द्रियं स्पर्शग्राहकं महदिन्द्रियं वा त्वक्॥ आप्यमिन्द्रियं रसग्राहकं महदि
न्द्रियं वा रसनं॥ पार्थिवमिन्द्रियं गन्धग्राहकं महदिन्द्रियं वा घ्राणं॥ महत्त्वं मनोवारणाय॥ कर्णशष्कुल्य
वच्छिन्नं नभः श्रोत्रं॥ शब्दग्राहकं महदिन्द्रियं वा॥ निःस्पर्शमणु मनः॥ निःस्पर्शपदं पार्थिवपरमाणुवा
रणाय॥ अणुपदं विभुवारणाय॥ अत्र मीमांसकाः॥ मनो नाणु॥ किंतु विभुः निःस्पर्शद्रव्यत्वात्॥ आत्मवत्॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ज्ञानापत्तेश्च ॥ यत्तु ॥ असंताभावग्रहे योग्यप्रतियोग्यनुपलब्धिः ॥ अन्योन्याभावग्रहे च योग्ये अधिकर
णे प्रतियोगितादात्म्यानुपलब्धिः सहकारिणी इति चेत् ॥ न ॥ जलपरमाणौ पृथिवीत्वासंताभावग्रहा
पत्तेः ॥ वायौ उद्भूतरूपवद्भेदग्रहापत्तेश्च ॥ न च इष्टापत्तिः ॥ अनुभवविरोधात् ॥ अन्योन्यं ते ॥ सोऽयम्
त्कारिसंपन्नानुपलब्धिः कारणं ॥ अतएव नांधकारे घटाभावग्रहश्चक्षुषा ॥ तत्र आलोकाधिकरण
संनिकर्षस्यापि हेतुत्वात् ॥ न वा जलपरमाणौ पृथिवीत्वाभावग्रहः ॥ योग्यसंनिकर्षस्याभावात् ॥
कः संनिकर्षो योग्यः ॥ पृथिवीत्वाभावग्रह क इति चेत् ॥ इंद्रियसंनिकृष्टमहत्त्वोद्भूतरूपवद्वृत्तिपणाम
उद्भूतरूपवत्त्वाभावे तु इंद्रियसंनिकृष्टमहत्त्ववद्वृत्तिगुणत्वं योग्यः संनिकर्षः ॥ अतो मनसि न तद्ग्रहः ॥
भवति च ॥ महति वायौ वेद्वे ॥ अन्यत्रापि संनिकर्षः कार्यवशादुन्नेयाः ॥ पिशाचात्यंताभावस्तु अयो

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ग्राहीनां स्पृष्टानां सन्निकर्षाणामभावात्॥ त्राहेति भ्रमाणां तरकत्वं नापत्तेः॥ अत्र नरोऽहं साक्षात्करोमीति प्रती
तेः॥ अप्रत्यक्षत्वापत्तिरिति चेत्॥ इहापि घटाभावं पश्यामीति प्रतीतेः प्रत्यक्षत्वेति तुल्यं॥ किंच॥ अनुपलब्धेः प्र
माजनने व्यापाराभावात् कथं प्रमाकरणत्वं॥ व्यापारवद्धि कारणं करणमिति स्मृतेः॥ न च॥ एवं घटाभाववति घ
टोपलब्धावपि घटाभावः प्रत्ययः स्यात्॥ इन्द्रियसंबंधविशेषणतायाः सत्त्वादिति चेत्॥ न॥ योग्यानुपल
ब्धेरपि अभावग्रहहेतुत्वात्॥ अथ॥ केयं योग्यानुपलब्धिः सहकारिणीति चेत्॥ न॥ जलपरमाणौ पृथि
वी॥ चास्यंताभावग्रहापत्तेः॥ न च॥ इह॥ पृथिवीत्वं चक्षुषो योग्यं तदनुपलब्धि जलपरमाणोऽपि पिशा सं x
चभेदग्रहानापत्तेश्च॥ पिशाचस्य प्रतियोगिनोऽयोग्यत्वात्॥ अथ॥ योग्याधिकरणे प्रतियोगिनो अनु
पलब्धिः सहकारिणीति चेत्॥ न॥ भूतले पिशाचाभावान्योन्याभावग्रहापत्तेः॥ परमाणौ महत्वाभावग्र

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ति घटपटौ न स्तः॥ घटो न घटपटौ॥ एकघटवत्त्वेन घटौ॥ एको न द्वाविति प्रतीतेः॥ एकघटवति द्वित्वावच्छिन्न
त द्वस्तेनाभावस्यैकस्मिन्नुभयान्योन्याभाववस्य च सत्वात्॥ न च प्रतियोगिमति कथं तदभाववत्ता यो वि
रोधादिति वाच्यं॥ प्रतियोगितावच्छेदकावच्छिन्नेनैवाभावस्य विरोधित्वात्॥ न चैकाद्वित्वावच्छिन्न॥ एको
द्वाविति प्रतीतेः॥ अत एव दंडिपुरुषो ह्रडे येनीते पुरुषे सति दंडीपुरुषो नास्तीति धीबलात् विशिष्टाभावो
विशेषणाभावविशिष्टविशेष्याभावरूपो ऽभ्युपेयते॥ न चेयं दंडाभावविषया॥ दंडवत्यपि तथा प्रतीतेः॥ न चापुरु
षाभावविषया॥ तस्य सत्वात्॥ तस्मात् यत्र विशेषणाभावो विशेष्याभाव उभयाभावो वा नास्ति तत्र विशिष्टाभा
घिका अवसेयः॥ नातु॥ अभावो नेंद्रियग्राह्यः॥ इंद्रियसंनिकर्षाभावात्॥ किंतु॥ अनुपलब्धिप्र
प प्रमाणागम्य एवेत्याहुः॥ तन्न॥ प्रमाणांतरकल्पनान्नः संनिकर्षांतरकल्पनाया लघुत्वात्॥ अन्यथा सं

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तिसाक्षिकोऽन्यभावोऽन्योन्याभावः॥ यदिदमाह॥ तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकोऽभावोऽ
न्योन्याभावः॥ तदन्योऽन्यभावः संसर्गाभाव इति॥ सोपि त्रिविधः॥ अत्यंताभावप्रागभावध्वं
साभावभेदात्॥ तत्र नित्योऽनुभवसाक्षिको नित्यः संसर्गाभावोऽत्यंताभावश्च॥ विनष्ट इति प्रतीतिसा
क्षिकोत्पत्तिमानभावः ध्वंसाभावः॥ स च न विनाशी॥ तद्विनाशकल्पनायां प्रमाणाभावात्॥ नहि विनाशो
नष्ट इति कश्चित्प्रत्येति॥ तस्यागभावश्च घटादिरूपप्रतियोगिलप्रागभावश्च॥ उभयत्र ध्वंसो भविष्यतीति प्र
तीतेः॥ विनाश्यभावः प्रागभावः॥ स च भविष्यतीति अनुभवसाक्षिको दुरपह्नवः॥ तस्य ध्वंसः प्रतियो
गिलध्वंसश्च॥ उभयत्र विनष्टः प्रागभाव इति प्रतीतेः॥ अत्यंताभावश्च अन्योन्याभावश्च नित्यौ॥ नित्यश्चा
भावो द्विविधः॥ एकमात्रवृत्तित्वधर्मावच्छिन्नप्रतियोगिताकोऽभावोऽन्यश्च॥ न चास्य मानाभावः॥ घटव

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

घटे ऽपि॥ तत्सत्वे घटाभावो नास्तीति प्रतीतेः॥ न च केवलाधिकरणरूप॥ उक्तयुक्तेरिति संप्रदाय॥
[illegible]॥ घटाभावाभावोऽप्यधिक एव॥ अभावत्वेन प्रतीतेः॥ न चायं भ्रमः॥ बाधकाभावात्॥ त
द्भावस्तु घटाभाव एव॥ न त्वधिक इति नानवस्था नमिस्याद्ः॥ स्याद्वेतत्॥ भूतले घटभेदभि
न्नेवा नवा॥ अंत्ये आयातं भूतलमेव घटभेद इत्यनेन॥ आद्ये तद्भेदोऽप्यधिकः स्यात्॥ स्यादेवेति चेत्॥ तर्हि तद्भे
॥ [illegible]॥ दोऽप्यधिकः स्यादित्यनवस्था॥ अनवस्थानया तद्भेदो नाधिकः॥ किंतु॥ अधिकरणरूप इति चेत्॥ [illegible]॥ एवं तू
रुक्तदूषणगणप्रसंगश्चैवं स्यात्॥ अत्रोच्यते॥ भेदभेदोऽप्यधिक एव॥ न चैवं तद्भेदोऽप्यधिकः स्यात्॥ इष्टत्वा
त्॥ न चेयमनवस्था दोषाय॥ प्रामाणिकत्वात्॥ तदाहुः॥ सर्वतो बलवता ह्यन्यथानुपपत्तिरिति संक्षे
पः॥ स चायमभावो द्वेधा॥ अन्योन्याभावः संसर्गाभावश्च॥ तत्रेदमिदं न भवतीति इदमेतद्भिन्नमिति प्रती

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रमादौ तद्भावात्॥ दृश्यते च महांधकारे चंद्रकांत अभृति मणिविशेषप्रभा॥ यथालोके तद्द्रव्य
चाक्षुषे आलोकसंयोगः सहकारीति चेत्॥ न॥ महांधकारे सुवर्णरूपतेजः साक्षात्कारापत्तेः॥
अत्रोच्यते॥ द्रव्य चाक्षुषमात्रे आलोकसंयोगः सहकारी॥ न चालोकचाक्षुषे व्यभिचारः॥
आलोके काशसंयोगस्य आलोकेपि सत्वात्॥ तस्य द्विनिष्ठत्वात्॥ न च महांधकारे सुवर्णसाक्षा
त्कारापत्तिः॥ अनभिभूतरूपालोकसंयोगस्यैव हेतुत्वात्॥ सुवर्णरूपं तु अभिभूतं॥ अन्यथा
सुवर्णरूपालोकात् द्रव्यांतरग्रहापत्तेः॥ संप्रदायविदस्तु॥ सुवर्णभिन्नं यत्तेजः तद्भिन्नद्रव्यचा
क्षुषे आलोकसंयोगो हेतुः॥ नवतिवे॥ सुवर्णमप्सुवर्णभिन्नं यत्तेजः तद्भिन्नं च्यतः तद्ग्रहेपि आ
लोकसंयोगो हेतुः॥ तेनांधकारे सुवर्णसाक्षात्कार इत्याहुः॥ तथापि॥ पूर्वस्यां दिशि आलोक

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

संयोगवतः परस्यां तद्दसंयुक्तस्यापिसादेः परदिगवच्छिन्नपुरुषस्य साक्षात्कारः स्यात्॥ आ
लोकसंयोगस्य पूर्वदिगवच्छेदेन सत्वात्॥ नैवं॥ यदवच्छेदेन आलोकसंयोगः तदवच्छिन्नच
क्षुःसंयोगस्य हेतुत्वात्॥ इह चेतदभावात्॥ स्यादेतत्॥ विशेषतानान प्रत्यासत्तिः॥ समवा
याभावयोरेवासत्वात्॥ नहि तयोर्मानमस्ति॥ अयं घटः अयं रूपवान् अयं चलतीति प्रत्य
क्षमेव घटत्वरूपचलनसंबंधविषयकः समवाये मानं॥ नहि घटादौ लेशमन्यसंबंधोऽस्ती
ति चेत्॥ न॥ स्वरूपसंबंधस्य आधाराधेयभावाख्यस्य सत्वात्॥ नहि समवाय एव घटत्वस्य
आधारता॥ पटादावपि सत्वात्॥ एकत्वैव हि पटत्वघटत्वयोः समवायः॥ नैवं॥ घटे घटत्वं सम
वेतरूपं च समवेतं तंतुषु पटः समवेतं इह कर्म समवेतमिति अनुगतसमवायाकारप्रती

CSU Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तत्सिद्धेः॥ नाभावोऽसन्॥ घटो नास्तीति प्रतीत्या तत्सिद्धेः॥ अथ प्राभाकराः॥ नाभावोऽधिकः॥
किंतु केवलाधिकरणस्वरूप एव[illegible]॥ किं तद्धाय प्रत्यासत्त्यंतरकल्पनेन॥ ननु॥ किमिदं केवलत्वं॥
भूतलस्वरूपं चेत्॥ सघटभूतलस्यापि तत्त्वापत्तेः॥ घटाभाववत्त्वं चेत्सिद्धं अभावेनेति चेत्॥ न॥
यत्राधिकरणे भवद्भिरभावोऽङ्गीक्रियते तदधिकरणस्य अभावत्वांगीकारात्॥ न च अभेदे आ
धाराधेयभावानुपपत्तिः॥ घटाभावे घटो नास्तीति प्रतीतेः॥ अभेदेपि त्वया घटाभावे[illegible]लथोऽभावे
अंगीकारात्॥ न चान्य एव घटाभावे घटाभावः॥ अनवस्थापत्तेः॥ अपसिद्धांताच्च॥ अथोच्यते॥
यदि भूतलविशेष एव घटाभावः तदा भूतले घटाभाव इति अभावाधारताप्रत्ययो न स्यात्॥
नहि भूतलं भूतलाधिकरणं॥ भूतले भूतलमिति प्रतीत्यापत्तेः॥ किंच॥ यच्चेदानीं घटआ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नीतः तदधिकरणं घटाभावो वा न वा ॥ आद्ये इदानीं घटो नास्तीति प्रत्ययः स्यात् ॥ अंत्ये अन्य
दापि घटो नास्तीति प्रत्ययो न स्यात् ॥ किंच ॥ कपाले घटो भविष्यति घटो नष्ट इति प्रतीतेरस्ति
कपाले पूर्वं घटप्रागभावः उत्तरकाले घटध्वंसः स च कपालस्याकालं सर्वदा तस्तीतिः
स्यात् ॥ कपालस्य सत्त्वात् ॥ अन्यथा कपालप्रतीतिरपि न स्यात् ॥ किंच ॥ एवं मोक्षोऽपि न
भावः आलरूपः स्यात् ॥ तथा च असाध्यता प्राप्तिर्नित्यत्वादिति संक्षेपः ॥ स्यादेतत् ॥
एवं घटाभावो नास्तीति प्रतीत्या घटाभावाभावोऽप्यधिकः स्यात् ॥ स्यादेवेति चेत् तर्हि तद
भावोऽप्यधिकः स्यादित्यनवस्था ॥ केवलाधिकरणं तदभाव इति चेत् ॥ तर्हि सर्वत्र स एवाभा
वोऽस्तु ॥ कृतमधिकेन ॥ भवदुक्तदूषणागणप्रसंगश्चैवं स्यात् ॥ [illegible] ॥ घटाभावाभावो

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

न्नेंद्रियविशेषणतयात्राभावो गृह्यते॥इंद्रियरूपेऽवृत्तेस्तस्य विशेषणत्वात्॥इंद्रियार्थसन्निकृ
ष्टविशेषणतयान्वितत्वाद्घटाभावादि॥इंद्रियसन्निकृष्टेऽन्वितत्वे तस्य विशेषणत्वात्॥इंद्रियसंनि
कृष्टविशेषणतापि बहुविधा॥सन्निकर्षस्यापि बहुत्वादवधेया॥ननु संयोगेन प्रत्यासत्तिः॥सं
युक्तसमवाये न घटादिग्रहसंभवात्॥इंद्रियसंयुक्तकपालादौ तेषां समवायात्॥मैवं॥आलोकानिलदसंभवा
त्॥तस्यात्र समवेतत्वादिति संक्षेपः॥स्यादेतत्॥अंधकारस्थघटादिकमिति चाक्षुषानोपलभ्यते
संयोगप्रत्यासत्तेः सत्वात्॥उच्यते॥चक्षुषा द्रव्यग्रहे महदुद्भूतरूपालोकसंयोगः सहकारी॥न चांध
कारे सोऽस्ति॥न च महदुद्भूतेति व्यर्थं॥तेजःपरमाणौ चक्षुरादिसंयोगयोः सत्वात्॥ननु एवं चक्षुषा
तेजःप्रत्ययो न स्यात्॥तत्र तेजःसंयोगाभावात्॥प्रदीपतत्प्रभासंयोगोऽस्तीति चेन्न॥मणि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

र्षः सहकारिणः॥ के ते संनिकर्षाः॥ संयोगः॥ संयुक्तसमवायः॥ संयुक्तसमवेतसमवायः॥ समवायः॥ स
मवेतसमवायः॥ विशेषणता च॥ अथ॥ केन सन्निकर्षेण किं गृह्यते॥ द्रव्यं संयोगेन गृह्यते॥ शब्देत
रगुणकर्मद्रव्यगता जातिः संयुक्तसमवायेन॥ भवति हि घटादिकं चक्षुरादिसंयुक्तं तत्र समवेतं रू
पादिस्पर्शो जातिश्च द्रव्यत्वादिः॥ शब्देतरगुणकर्मगता जातिः संयुक्तसमवेतसमवायेन॥ भवति हि
चक्षुरादिसंयुक्तं घटादिः तत्समवेतं रूपादिः तत्र समवायो रूपत्वादेः॥ शब्दः समवायेन गृह्यते॥ क
र्णशष्कुल्यवच्छिन्नेन नभसि शब्दस्य समवायात्॥ शब्दगता जातिः समवेतसमवायेन॥ श्रोत्रसम
वेते शब्दे शब्दत्वस्य समवायात्॥ विशेषणतया समवाय अभावश्च॥ तत्र संयोगसमवाययोर
भावात्॥ सा च विशेषणता द्विविधा॥ इंद्रियविशेषणता इंद्रिय संनिकृष्टविशेषणता च॥ त

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्व ॥ तथा हेतुतायां [redacted] वात् ॥ न च घटाकाशसंयोगस्य प्रत्यक्षतापत्तिः ॥ योग्यमात्रसमवेतगुणस्यैव

योग्यत्वात् ॥ किं च लाघवात् ॥ संयोगप्रत्यक्षत्वावच्छेदेन यावदाश्रयप्रत्यक्षस्य हेतुतायुज्यते ॥ न च

संबंधप्रत्यक्षत्वावच्छेदेन ॥ संबंधत्वं हि संयोगसमवायान्यतरत्वमिति ॥ गौरवात् ॥ घ्राणग्राह्यो मह

त्वसमानाधिकरणोद्भूतो गंधः ॥ तद्वृत्तं सामान्यं तयोः समवायः ॥ अत एव परमाणुगंधो न गृह्यते ॥

महत्वासमानाधिकरणत्वात् ॥ न च घ्राणायोग्यो नास्ति वज्रादिगंधः ॥ अनुद्भूतत्वात् ॥ रसनायो

ग्यमहत्वसमानाधिकरणोद्भूतो रसः ॥ तद्वृत्तं च सामान्यं तयोः समवायः ॥ तेन परमाणुरसो न गृ

ह्यते ॥ महत्वासमानाधिकरणत्वात् ॥ न वा मणयादिरसः ॥ अनुद्भूतत्वात् ॥ श्रावणयोग्यः शब्दः ॥

तद्वृत्तजातिः ॥ तयोः समवाय इति संक्षेपः ॥ तस्य चोद्दिष्टस्य सन्निकर्षस्यार्थग्राहकत्वात् ॥ सन्निक

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

तस्पर्शोऽयं ॥ अत एव वायुपरमाण्वादयस्त्वचा न गृह्यन्ते ॥ चक्षुरयोग्यत्वात् ॥ न वा प्रदीपप्रभापरिमा
णादयः ॥ उद्भूतस्पर्शाभावद्वृत्तित्वात् ॥ न वा घटप्रभासंयोगादयः ॥ उद्भूतस्पर्शवन्मात्रावृत्तित्वात् ॥
तत्र हि अनुद्भूतस्पर्शादयो वर्त्तन्ते ॥ कर्म च योग्यद्रव्यसमवेतं ॥ जातिस्तु योग्यवस्तुगता ॥ समवाय
ये ॥ मीमांसकास्तु ॥ महदुद्भूतस्पर्शवद्द्रव्यत्वेनैव त्वचो योग्यता ॥ लाघवात् ॥ ननु महदुद्भूतरूपमपि तस्य योज
कं ॥ गौरवात् ॥ अतो वायुरपि स्पार्शनप्रत्यक्षः ॥ ननु बहिरिन्द्रियजन्यद्रव्यसाक्षात्कारत्वावच्छेदेनोद्भूतरूप
स्य हेतुत्वात् ॥ वायोस्तदभावान्नैवमिति वाच्यं ॥ लाघवात् ॥ द्रव्यचाक्षुषत्वावच्छेदेन तद्धेतुत्वात् ॥ वैशेषि
कास्तु ॥ समवायो न प्रत्यक्षः ॥ संबन्धप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वात् ॥ कथमन्यथा घटाका
शसंयोगोऽपि न प्रत्यक्षः ॥ न च समवायस्य सर्वे आश्रयाः प्रत्यक्षाः ॥ परमाण्वादेरयोग्यत्वादिति प्राहुः ॥

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्यादेतत्॥ चक्षुर्यदि द्रव्यग्राहकं तर्हि परमाणवादयोपि गृह्णेरन्निति चेत्॥ न॥ तेषां चक्षुरयोग्यत्वा-
त्॥ किं तावच्चक्षुषो योग्यं॥ महदुद्भूतरूपवद्द्रव्यं॥ परमाणुश्च न महान्॥ आत्मादयश्च न रूपवं-
तः॥ पिशाचादयश्च नोद्भूतरूपवंतः॥ तद्रूपस्यानुद्भूतत्वात्॥ उद्भूतत्वं जातिविशेष इत्येके॥ अनुद्भूतत्व-
जातस्वभावइत्यपरे॥ योग्यगुणाः॥ योग्यद्रव्यरूपतन्मात्रवृत्तिसंख्यापरिमाणपृथक्त्वसंयोगविभाग-
परत्वापरत्वद्रवत्वस्नेहवेगाः॥ मात्रपदं घटाकाशसंयोगवारणाय॥ कर्म च योग्यद्रव्यसमवेतं॥
जातिस्तु योग्यवस्तुगता॥ द्रव्यत्वरूपत्वादिः॥ समवायश्च॥ त्वचो महदुद्भूतरूपस्पर्शवद्योग्यद्रव्यं॥
तेन परमाणुवायुप्रभादयस्त्वचा न गृह्यंते॥ परमाणोरमहत्वात्॥ वायोर्नीरूपत्वात्॥ प्रभायास्तु-
द्भूतस्पर्शाभावात्॥ गुणाश्च॥ रूपातिरिक्ताश्चक्षुषो योग्याः महदुद्भूतस्पर्शवन्मात्रवृत्तयः॥ महदुद्भू

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

णं च ॥ ननु ॥ मनसोऽव्याहतत्वे सति कस्यापि विप्रकृष्टस्योपलब्ध्यापत्तिः ॥ न चास्ममाव्याहतं ॥
सर्वविषयत्वज्ञातव्याघातात् ॥ उच्यते ॥ मनः सर्वविषयकमपि बहिर्विषयकज्ञानजनने परतंत्रं ॥ परं
चक्षुरादि ॥ उपस्थितिर्योगजधर्मः सामान्यलक्षणं च ॥ न पुनः चक्षुरादिमात्रं ॥ स्थूलपदार्थानां मनसा
संसर्गग्रहात् ॥ कथमन्यथा कविकाव्यादि ॥ योगिनां योगजधर्मवशात्तस्य मनसः सर्वसाक्षात्कारा
स्ते ॥ मेयत्वादिसामान्यलक्षणाज्ञस्यास्मन्मनसः सर्वग्रहाच्च ॥ ननु तर्हि मनः स्वतंत्रं ॥ स्वबाह्यवस्तुनि ॥
कान्यबाह्यानि ॥ आत्मतद्योग्यगुणाश्च तदभाववत्तद्वृत्तिजातिश्च ॥ के ते योग्यगुणाः ॥ सविकल्पके
ज्ञाने ज्ञानेछाप्रयत्नसुखदुःखद्वेषास्तदेकत्वपरिमाणे च ॥ तत्र एकत्वपरिमाणे तु न योग्ये इति टीका
कृतः ॥ ननु ॥ एवं परात्मा परेणाग्रह्येत तद्गुणाश्चेति चेन्न ॥ परात्मतद्गुणानां परायोग्यत्वात् ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नविषयता॥ ज्ञानविषययोः संबंधः स्वरूपा॥ मूलं चैतत्॥ कथमन्यथा ज्ञानकर्मत्वं घटादेः॥ क्रियाजन्यफल
शालित्वादित्याहुः॥ मूलं॥ विनष्टे घटे ज्ञातइति प्रतीतेः नहि तत्र ज्ञानं किंचिज्जनयितुं शक्नोति॥ तस्यै
वासत्वात्॥ न च समवायिकारणतां विनाभावकार्योत्पत्तिः संभवति॥ तत्र स्वरूपसंबंधविशेषएव भूतो
त्ते विषय इति चेत्॥ अन्यत्रापि स एवास्तु॥ कृतमधिकेन॥ कर्मविभक्तेरपि तद्देवोपपत्तेरिति संक्षे
पः॥ [illegible] ॥ अन्ये तु भासमानवैशिष्ट्यप्रतियोगित्वं प्रकारत्वं॥ अयं घट इत्यत्र घटत्वस्य वैशिष्ट्यं भासते॥
तत्प्रतियोगी च घटत्वमित्याहुः॥ मूलं॥ दंडपुरुषसंयोग इति समूहालंबने दंडी पुरुष इतिवत् दंडस्य प्र
कारतापत्तेः॥ संयोगो हि दंडस्य वैशिष्ट्यं भासते॥ तत्प्रतियोगी च दंड इति दिक्॥ [illegible] ॥ तत्र प्रत्यक्षमिंद्रिया
त्मकं द्वेधा॥ द्रव्यग्राहकमद्रव्यग्राहकं च॥ द्रव्यग्राहकाणि चक्षुःस्त्वङ्मनांसि॥ अन्यच्च घ्राणरसनश्रव

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नैवस्मरणं॥तस्य तद्धेतुत्वात्॥किंच यत्र घटत्वेन स्फुरतं तत्र विशिष्टज्ञान सामग्र्य भावात्॥ तं घट घटत्वयोः साक्षात्कारसामग्रीतः साक्षात्कारोत्पत्तौ न किंचिद्बाधकमस्ति॥ तदेवं देवास्माकं निर्विकल्पकमिति संक्षेपः॥ ननु॥ विशेषणज्ञानस्य हेतुतासिद्धौ सर्वमेतदेवं स्यात्॥ तत्रैव च मानं नोपलभ्यामइति चेत्॥ न॥ अन्वयव्यतिरेकाभ्यां तदवधारणात्॥ विस्तरस्तु मतिमरीचावनुसंधेयः॥ ॥वैशिष्ट्यावगाहिसप्रकारकं वा ज्ञानं सविकल्पकं॥ प्रकारता च विषयता विशेषः॥ विषयता च विषयं घट इत्यादिज्ञाने विशेषणस्य घटत्वादेः विशेषणतापरनामा वि[illegible]षयताविशेषः॥ विषयता च विषयाकारप्रतीतिसाक्षिकः स्वरूपसंबंधविशेषः॥ ननु पदार्थांतरं॥ पदार्थांतरमित्येकदेशिनः॥ ॥नन्वस्तु॥ ज्ञातो घट इति प्रतीते र्ज्ञानजन्यो विषयनिष्ठा ज्ञाकेद्धा परनामा परपदार्थो ज्ञातता से

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

दत्वविशिष्टज्ञानं नास्ति॥ विशेषणीभूतघटत्वस्य अज्ञानात्। ततो वैशिष्ट्यानवगाह्येव तद्धा
अं। तदेव च निर्विकल्पकं। न चैवं जन्मान्तरीय घटत्वविशिष्टज्ञानं तत्र कारणं॥ अयं वो हि तद्भ
र्नकालवर्त्तिन एव विशेषणज्ञानस्य हेतुत्वात्॥ न चैवं भागवत घटत्वज्ञानं तज्जनकं॥ समाना
धिकरणत्वस्यासत्त्वात्तस्य हेतुत्वाच्च॥ भागवतज्ञानस्य व्यधिकरणत्वात्। न च व्य
घटत्वविशिष्टस्मरणमेव तत्र कारणं॥ न च विशेषणज्ञानं विना तदेव विशिष्टज्ञानं कु
अमिति चेत्॥ विशिष्टानुभवे हि विशेषणज्ञानं कारणं॥ ननु स्मरणोपि तेन विना नुपपन्नं॥
स्य अन्यथा अनवस्थानात्। अस्तु वा निर्विकल्पक घटत्वस्मरणमिति चेत्। न। चैवं त्वा
दि विशिष्टबुद्धेस्तदसंभवात्॥ नहि चैत्रत्वादिके सर्वमनुभूयं यतः स्मरेत्। न चानुभवादि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

विशेषणीयत्वात्॥ मानसत्वं जातिविशेषः प्रत्यासत्तिविस्तरः॥ नास्तिकास्तु। वैशिष्ट्यानवगाहिज्ञाने सा
क्षात्कारः॥ अयं घट इत्यादिज्ञाने च साक्षात्कारप्रत्ययो भ्रांतिः॥ घटत्वाद्यलौकिकविषयत्वादित्या
हुः॥ तन्न॥ बाधकं विना भ्रांतित्वायोगात्॥ न चालौकिकविषयत्वं बाधकं॥ घटत्वादेरलौकिकत्वासि
द्धेः॥ स च साक्षात्कारो द्विविधः। नित्योऽनित्यश्च॥ नित्यो भगवतः॥ अनित्योऽन्यः॥ अनित्यो द्विविधः॥ निर्वि
कल्पकः सविकल्पकश्च॥ तत्र वैशिष्ट्यानवगाहिज्ञानं निष्प्रकारकं वा निर्विकल्पकं॥ तच्च यद्यपि न प्रत्य
क्षसिद्धं॥ अतींद्रियत्वाभ्युपगमात्॥ तथापि अयं घट इति विशिष्टज्ञानरूपकार्यादनुमेयं॥ तथाहि
५ नैं २ जन्यतद्विशिष्टज्ञानं तद्विशेषणज्ञानकारणं॥ इति निर्विवादं॥ न वस्ति च प्राथमिकमस्माकमन
यं घट इति ज्ञानं जन्यघटत्वविशिष्टज्ञानं॥ अतस्तत्रापि घटत्वज्ञानं कारणं॥ तच्च तदानीं प्र

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्मनावेसीतित्तलीया॥ चित्वादित्य[illegible]मित्यास्तु करणाद्याकारानुगतमतेः करणत्वादिकमखंडोपा
धिरूपेसामान्यमंगीचक्रुः॥ तच्च प्रमाणं चतुर्विधमित्याह॥ नगनान्युत्र कारः॥ ॥ प्रत्यक्षानुमा
नोपमानशाब्दाः प्रमाणानीति॥ ॥ तत्र साक्षात्कारिरूपप्रमाकरणं प्रत्यक्षं॥ साक्षात्कारत्वं च सा
क्षात्करोमीत्यनुगतप्रतीतिसाक्षिको जातिविशेषः॥ न चेयमिंद्रियजन्यज्ञानविषया॥ ज्ञानमात्र
स्य मनोरूपेंद्रियजन्यत्वात्॥ इंद्रियाप्रतीतावपि तथाप्रतीतेश्च॥ नापि चाक्षुषत्वादिज्ञानविषया॥
न्यननु[illegible]तत्वात्॥ यद्वा॥ जन्यधीजन्यमात्रवृत्ति जातिः अन्यज्ञानत्वं तत्व॥ नवृत्तिर्हि॥ जन्यधीज
न्यमात्रवृत्तिरनुमितित्वादितद्भिन्नत्वं साक्षात्कारमात्रे॥ न च निदिध्यासनजन्यमात्रवृ
त्ति मोक्षजनकतावच्छेदकजातिमत्तितत्व साक्षात्कारेऽव्याप्तिः॥ मानसावृत्तित्वेन जाते

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ति च संयोगेपि प्रमा स्यात्॥ कपिसंयोगवति वृक्षे न द्रव्यग्राहि चादिति चेत्॥ न॥ वृक्षे कपिसंयोग इत्य
यस्तु प्रमैव॥ मूले अवच्छेदकभेदस्य यस्तु न तथा॥ तस्य तदनवच्छेदकत्वात्॥ स्मृतिभिन्नं ज्ञानत्वम
नुभवत्वं॥ जातिविशेषो वा॥ अनुभवामीत्यनु[illegible]तप्रलेबाधकं विना जातिविषयत्वात्॥ करणत्वं
च व्यापारवदसाधारणकारणत्वं करणत्वं॥ घटं प्रति कपालद्वयसंयोगवारणाय व्यापारवदिति
ईश्वरज्ञानवारणाय असाधारणेति॥ नन॥ एवं [illegible]नं प्रति आत्मापि करणं स्यात्॥ आत्ममनःसंयो
गरूपव्यापारस्य सत्वात्॥ तज्जन्यत्वे सति तज्जन्यजनको वा व्यापारः॥ मनोवृत्तिवसंयोगः आ
त्मजन्यः आत्मजन्यज्ञानजनकश्चेति चेत्॥ स्यादेवं॥ उपाधीनां करणत्वादीनां भेदाच्च व्यवहा
रभेदः॥ अत एव विशेषतः कारकविनिर्णये [illegible] नां भवतीति शाब्दिकाः॥ अत एव [illegible] आत्मान

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

...॥ प्रतान्यपरमात्मानं जानं ...नाथ ...॥ क्रियते युक्तिशु लामि न्योयसि त्रांत
...जरो॥ ॥ इहखलु निखिललोकविमोक्ष मुमुक्षोपायमननोपायमास्ति नह्लले ज्ञानमामनंति॥
नन्ने प्रमाणाधीनमिति प्रमाणं निरूपते॥ ... प्रमायाः करणं प्रमाणं॥ प्रमा च यथार्थानुभवः॥
तदाहुराचार्याः॥ यथार्थानुभवो मानमित्येतन्नु॥ किमिदं याथार्थ्यं॥ किंचानुभवत्वं॥ उच्यते
तद्वति तद्वग्राहित्वं याथार्थ्यं॥ यथेदं हि रजतमिति इदं रजतमिति ज्ञानं रजतत्ववति तद्वग्राहीति
याथार्थ्यं॥ शुक्तौ विदं रजतमिति ज्ञानं च न रजतत्ववति तद्वग्राहीति न याथार्थ्यं॥ ... एवं
...जते इदं रजतं न वेत्ति संशयोपि प्रमाण्या... चेत्॥ ...॥ रजतत्वांशेऽप्रमेव॥ तद्वति तद्वेन
...प्रमा इति प्रामाणिकाः॥ ... शब्दाव ... नकपि संयोगव ... स्वर्योगी

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

5

॥ ॥सिद्धांतमंजरीप्रसंगप्रारिच्छेदः॥ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ಲ್ಲಿ ಶುಕ್ರವಾರ ಕಾಂಗ್ರೆಸ್ ಹಮ್ಮಿಕೊಂಡಿದ್ದ ರೋಡ್ ಶೋದಲ್ಲಿ ಭಾಗವಹಿಸಿದ್ದ ಜನಸ್ತೋಮ.

ಾಡಿ, ಜೆಡಿಎಸ್-ಬಿಜೆಪಿ ಒಪ್ಪಂದ ನಾವಣೆ ಎದುರಿಸುತ್ತಿವೆ ಎಂದರು.
ೋಡಿಕ್ಯಾಂಪ್‌ನಿಂದ ಬೆಂಬಲಿಗ ಣಿಗೆಯಲ್ಲಿ ಸಾಗಿ ಮಹಾತ್ಮಾಗಾಂಧಿ ಂಗ ಸಭೆ ನಡೆಯಿತು. ಕಾಂಗ್ರೆಸ್ ೀಲಕಂಠಪ್ಪ, ಎಸ್.ಎಂ.ನಾಗರಾಜ್, ಟಿ.ಎಚ್.ಶಿವಶಂಕರಪ್ಪ, ಕೆಪಿಸಿಸಿ ಸದಸ್ಯ ಟಿ.ವಿ.ಶಿವಶಂಕರಪ್ಪ, ಡಾ.ಮರರುಳಸಿದ್ದಪ್ಪ, ಮುಖಂಡರಾದ ಎಚ್.ಓಂಕಾರಪ್ಪ, ಪರಮೇಶ್, ಕೆ.ಆರ್.ದ್ರುವಕುಮಾರ್, ಆರ್.ಮಂಜುನಾಥ್, ಜಿ.ಎಚ್.ಶ್ರೀನಿವಾಸ್, ಫಾರೂಕ್, ಅಬ್ದುಲ್‌ಘನಿ ಅನ್ವರ್, ಧರ್ಮರಾಜ್, ಪ್ರಕಾಶ್ ಮತ್ತು ಮಿಲ್ಟ್ರಿ-ಶ್ರೀನಿವಾಸ್ ಇದ್ದರು.

ಬಿ.ಝಡ್.ಜಮೀರ್ ಅಹ್ಮದ್ ಖಾನ್ ಆಪಾದಿಸಿದರು.

ಇಲ್ಲಿನ ಕೋಟೆಕ್ಯಾಂಪ್‌ನಲ್ಲಿ ಜೆಡಿಎಸ್ ಅಭ್ಯರ್ಥಿ ಬೋಜೆಗೌಡ ಪರ ಮತ ಪ್ರಚಾರ ನಡೆಸಿದ ಅವರು ಶುಕ್ರವಾರ ಸುದ್ದಿಗೋಷ್ಠಿಯಲ್ಲಿ ಮಾತನಾಡಿದರು.

ಒಂದು ವೇಳೆ ಬಿಜೆಪಿ ಈ ಉಪ ಚುನಾವಣೆಯನ್ನು ಗೆದ್ದಲ್ಲಿ ಮುಖ್ಯಮಂತ್ರಿ ಡಿ.ವಿ. ಸದಾನಂದಗೌಡ ಪಕ್ಷದಲ್ಲಿ ದೊಡ್ಡ ನಾಯಕರಾಗಿ ಬಿಡುವ ಸಾಧ್ಯತೆ ಇರುವುದರಿಂದ ಮಾಜಿ ಮುಖ್ಯಮಂತ್ರಿ ...ರುವುದು ಹಾಸ್ಯಾಸ್ಪ. ಚುನಾವಣಾ ಪೂರ್ವದಲ್ಲಿ ಜೆಡಿಎಸ್ ಪಕ್ಷವನ್ನು ಕಡೆಗಣಿಸಿದ್ದ ಕಾಂಗ್ರೆಸ್‌ಗೆ ಈಗ ಜ್ಞಾನೋದಯವಾಗಿದೆ ಎಂದು ಅವರು ಹೇಳಿದರು.

ರಾಜ್ಯ ಅಲ್ಪಸಂಖ್ಯಾತ ವಿಭಾಗ ರಾಜ್ಯ ಘಟಕ ಪ್ರಧಾನ ಕಾರ್ಯದರ್ಶಿ ಶಕೀಲ್ ಅಹ್ಮದ್, ಮುಖಂಡ ಧರ್ಮೇಗೌಡ, ಎಂ.ನರೇಂದ್ರ, ರಫೀಕ್ ಅಹ್ಮದ್, ಶಫಿ ಅಹ್ಮದ್ ರಾಜ್ಯ ಹಿಂದುಳಿದ ವರ್ಗ ಅಧ್ಯಕ್ಷ ಶಿವಾನಂದ ಮತ್ತಿತರರು ಇದ್ದರು.

ಸ್ವರ್ಣಭಸ್ಮದ ಸಾಮರ್ಥ್ಯ ಸಮೇತ . . . . ಅದರ ಪರಿ
ಕಾರಣದಿಂದಾಗಿ ಇಂದಿಗೂ ಅದನ್ನು ಒಪ್ಪಿಕೊಳ್ಳಲಾಗ



• ಸ್ವರ್ಣಭಸ್ಮದ ಜೊತೆಗೆ ಶಿಲಾಜಿತ್, ಸಫೇ ಅಶ್ವಗಂಧ, ಕೌಂಚ್‌ಬೀಜ್, ಶತಾವರಿ ಇತ ಸಮೃದ್ಧವಾಗಿದೆ.
• ಈ ದಿನವೇ ವಿಟಾ-ಎಕ್ಸ್-ಗೋಲ್ಡ್ ಪ್ಲಸ್ ಮತ್ತು ಯೌವನದ ಉತ್ಸಾಹದ ಲಾ ಅನುಭವಿಸಿ.
• ನಿಮ್ಮ ಯೌವನ ಶಕ್ತಿಗಾಗಿ ಮತ್ತು ಜಿ
• ಸುರಕ್ಷಿತ ಮತ್ತು ಆಯುರ್ವೇದ ಔ

Available at all Leading Ayurvedic & C

ITC 100 Inspiring Years

ಹೊಸ ವಿವೆಲ್
— ಸ್ಯಾಂಡಲ್ ಗ್ಲೋ —

KAFF
Performance with style

DISHWASHER INTRA 60
Built-in, Stainless steel panel • Size: 60 cm
MRP ₹ 38,990



CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri